"जिह्मं त्यजेयुर्निर्लाभमशक्तोऽन्येन कारयेत्" याज्ञ०। "सुहृदर्थमीहितमजिह्मधियाम्" माघः ४कपटे न०। "तदाशु कर्त्तुं त्वयि जिह्ममुद्यते" किरा० "जिह्मं कपटम्" मल्लि० । ५पिहिते त्रि० "जिह्मवारमपोर्णु त" ऋ० ८।४।५। "जिह्मवारं पिहितद्वारम्" भा० । ६अधस्ताद्वर्त्तमाने च । "उच्चाबुध्नं चक्रतुर्जिह्मबारम्" ऋ० १।११६।११। "जिह्ममधस्ताद्वर्त्तमानम्" भा०। ७अप्रसन्ने च । "विधिसमयनियोगाद्दीप्तिसंहारजिह्मम्" किरा० "जिह्मम- प्रसन्नम्" मल्लि० ।

**जिह्मग** पुंस्त्री जिह्मं कुटिलं मन्दं वा गच्छति गम—ड । १सर्पे स्त्रियां जातित्वात् ङीष् । २मन्दगे त्रि० मेदि० स्त्रियां टाप् । "व्रतं चक्रे विनाशाय जिह्मगानां धृतव्रतः" "स दृष्ट्वा जिह्मगान् सर्वांस्तीव्रकोपसमन्वितः" भा० आ० ६ अ० । [शब्दर० स्त्रियां जातित्वात् ङीष् ।

**जिह्ममेहन** पुंस्त्री जिह्मं मन्दं मेहति मिह—ल्यु । भेके

**जिह्मशल्य** पु० जिह्मं कुटिलं शल्यमस्मात् । खदिरवृक्षे जटा०

**जिह्माशिन्** त्रि० जिह्मं मन्दमश्नाति अश—णिनि । मन्दभोजिनि ततः अपत्ये शुभ्रा० ढक् । जैह्माशिनेय तदपत्ये पु० स्त्री ।

**जिह्वल** त्रि० ह्वल—अच् बा० सन्वच्च जिह्वं जिह्वाव्यापारं लाति ला—क वा । भोजनलोलुपे । "श्राद्धं कृत्वा परश्राद्धे भुञ्जते ये च जिह्वलाः । पतन्ति नरके घोरे लुप्तपिण्डोदकक्रियाः" श्रा० त० ।

**जिह्वा** स्त्री लेढ्यनया लिह—स्वादे व "शेवयह्वजिह्वेत्यादिना" नि० । १रसास्वादकरणे इन्द्रियभेदे २तदधिष्ठाने गोलके (जिव) ख्याते पदार्थे च । तदिन्द्रियस्य जलीयत्वं सि० मु० समर्थितं यथा "रसनं जलीयं गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात् सक्तुरसव्यञ्जकोदकवत् रसनसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वे सतीति विशेषणीयम् । तस्याधिष्ठातृदेवता च प्रचेताः "दिग्वातार्कप्रचेतोऽश्वीत्यादि" शा० ति० उक्तेः । अग्नेर्जिह्वाश्च सप्त तन्नामानि "काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा । स्फुलिङ्गिनी विश्वरूपी च देवी लेलायमाना इति सप्त जिह्वाः" मुण्डकोप० ।"तस्याः कफादिदोषात् लक्षणादिकं भाव०प्र० दर्शितं यथा "शाकपत्रप्रभा रूक्षा स्फुटिता रसनाऽनिलात् । रक्ता श्यामा भवेत् पित्तात्लिप्ताऽऽर्द्रा धवला कफात् । परिदग्धा खरस्पर्शा कृष्णा दोषत्रयेऽधिके । सैव दोषद्वयाधिक्ये दोषद्वितयलक्षणा" अस्य क्लीवत्वं भरत आह स्म । जिह्वलः । इन्द्रियपरत्वे तथात्वमिति तु युक्तम् । ३वाक्ये निघण्टुः

**जिह्वाजप** पु० जिह्वया जपः । "जिह्वाजपः स विज्ञेयो केवलं जिह्वया बुधैः" तन्त्रसारोक्ते जपभेदे । "उच्चैर्जपाद्विशिष्टः स्यादुपांशुर्दशभिर्गुणैः । जिह्वाजपः शतगुणः साहस्रो मानसः स्मृतः" तन्त्रसा० तत्फलमुक्तम् ।

**जिह्वानिर्लेखन** न० जिह्वा निर्लिख्यतेऽनेन निर्+लिख—करणे ल्युट् । (जिवछोलान) द्रव्यभेदे तल्लक्षणं यथा "जिह्वानिर्लेखनं हैमं राजतं ताम्रजं तथा । पाटितं मृदु तत्काष्ठं मृदुपत्रमयं तथा । तत्काष्ठं दन्तधावनयोग्यकाष्ठम् । दशाङ्गुलं मृदु स्निग्धं तेन जिह्वां लिखेत् सुखम् । तज्जिह्वामलवैरस्यदौर्गन्ध्यजड़ताहरम्" भाव० प्र० ।

**जिह्वाप** पुंस्त्री जिह्वया पिबति पा—क । १कुक्कुरे २व्याघ्रे ३विड़ाले ४भल्लूके च शब्दरत्नावली ५चित्रकव्याघ्रे विश्वः । स्त्रियां जातित्वात् सर्वत्र ङीष् ।

**जिह्वामल** ६त० । जिह्वास्थितमले कुलके त्रिका० ।

**जिह्वामूल** न० ६त० । जिह्वाया मूले । तत्र भवः छ । जिह्वामूलीय अयोगवाहान्तर्गतवर्णभेदे । "जिह्वामूलीयस्य जिह्वामूलम्" सि०कौ० । स च कखयोः परयोः विसर्गस्थाने जातः । कवर्गे च "जिह्वामूले तु कुः प्रोक्तः" शिक्षायां कवर्गस्य जिह्वामूलस्थानत्वोक्तेस्तथात्वम् ।

**जिह्वारद** पुंस्त्री० जिह्वा रद इव यस्य । पक्षिणि हारा० तस्य जिह्वाया एव दन्तकार्य्यकारित्वात्तथात्वम् । स्त्रियां जातित्वात् ङीष् ।

**जिह्वारोग** पु० मुखरोगान्तर्गतजिह्वागतरोगभेदे । तल्लक्षणादि भावप्र० उक्तं यथा ।

"वातजः पित्तजश्चापि कफजोऽलाससंज्ञकः । उपजिह्विका च गदा जिह्वायां पञ्च कीर्त्तिताः । तत्र वातजस्य लक्षणमाह । जिह्वाऽनिलेन स्फुटिता प्रसुप्ता भवेच्च शाकच्छदनप्रकाशा । स्फुटिता सनाग्विदीर्णा । प्रसुप्ता रसानभिज्ञतया सुप्तेव । शाकच्छदनप्रकाशा शाको मरुभूमिजातो द्रुमः तद्वत् कण्टकाचिता । पित्तजमाह । पित्तात् सदाहैरुपचीयते च दीर्घैः सरक्तैरपि कण्टकैश्च । कफजमाह । कफेन गुर्वी बहुलाचिता च मांसोच्छ्रयैः शाल्मलिकण्टकाभैः । बहुला स्थूला । मांसोच्छ्रयैः मांसजकण्टकैः । अलासमाह । जिह्वास्थले यः श्वयथुः प्रगाढ़ः सोऽलाससंज्ञः कफरक्तमूर्त्तिः । जिह्वां सस्त